अथकल्पलतामारंभोयंम्॥ श्रीयोगे
श्वरीभैरवार्पणंभूयात्॥ श्रीगजानन॥

श्रीगणेशायनमः ॥ ॥ अथकल्पलतालिख्यते ॥ स्वानंदाख्यसनंदनादिबुध
मस्वादारविंदाद्वयंनानानंदनिदानमेकरदनंदुष्टार्दनंसद्वयं ॥ भालेंदुमद
मत्तदंतिवदनंदानंदधानंसदानंदेवंमदनारिनंदनमहंवंदेसुतुंदंमुदा ॥ १ ॥
मच्छिद्रनाथचरणस्मरणप्रवीणः श्रीरुद्रभट्टतनयोविनयोपपन्नः ॥ सोमा
भिधानगणकोगणकौरुतुष्ट्यैसंवत्सरादिफलकल्पलतांतनोति ॥ २ ॥
हीनेस्मिन्नृपशालिवाहानशाकेपूर्णांगबाणेंदुभि १५६० र्यातावर्षाःखलु
चात्रज्ञानिगदितास्तेनेत्रचंद्रै १२ र्युताः ॥ व्योमांगैपरिशेषिताःप्रभवतः
संवत्सरोदक्षिणैरेवानःप्रथितोभवेत्सनवभिर्युतस्तेथवोत्तरे ॥ ३ ॥ अ

थसंवत्सरफलं ॥ क्षितिपतिरतिभीतिःप्रोल्लसद्दुर्नीतिर्यदपिजलदरूपंकिर्म
ष्यहर्षंकरोति ॥ तदपिकणसमृद्धिर्हीनिरोगोभवाधिः प्रभवउदितसि
ध्दिःस्याज्जनःसाधुबुद्धिः ॥ १ ॥ सकलमनुजतुष्टिर्लोकदोषैकदृष्टिः क्षिति
पतिरतिवृष्टिर्वह्निभितिप्रवृत्तिः ॥ व्रजधनकणवृद्धिरामेहिनीत्रांनचौरा
विभवउरुवारीराधेनवःक्षीरपूराः ॥ २ ॥ पुत्रमित्रवनितानुरागतःस्याज्जन
प्रविततांमुदंगतः ॥ दुष्टभूपनिकरःपरस्परंशुक्लनाभिविदधातिसंगरं ॥ ३ ॥
नृपाःस्वल्पसंग्रामकर्माभिधानाजनाःकिंचिदिष्टामयैःपीड्यमानाः ॥
तथापिप्रमोदान्वितास्सकंदंभाभवेयुःप्रमोदाभिधोब्देल्पलाभाः ॥ ४ ॥

क्रोधिनेप्यदपिदेहिनोह्यलंनस्यअंनिनिजवर्त्मनिर्मलं॥ वर्षणाद्दुकुरुणाप्र
जापतिःख्यातनाम्निधनेसौख्यसंभृतिः॥५॥ अन्नदानवशुन्तोजन्मनि
जान्यौषणयंनिबद्धरोगनिश्चिवजान्॥ जन्मिनःस्ववनितासुखान्विताभूभु
जोगिरसिसंगरेरताः॥६॥ स्युर्द्विजाबद्धमखक्रियोत्सुकावारिपूरिनन
डागवापिकाः॥ भूभृतधनधान्यसंयुताश्रीमुखेनरिपुनाशरोगताः॥७॥
अल्पवृष्टिवशतोल्पसस्यताभूभृतामतिरणक्रियामताः॥ भावनाम्नि
यदपिरोगिणःस्युस्तथापिसुखिनःशरीरिणः॥८॥ क्षितिःसंतृणा
धेनवोदुग्धपूर्णासुवर्णाभिसंतोषिणःसर्ववर्णाः॥ सुभिक्षंनृपादेवभ

देवभक्ताःयुवादेश्रुवानास्त्रियोन्योन्यसक्ताः॥९॥ युद्धकर्मनिरताअवनी
शास्युःपरस्परकृतानभिनिवेशाः॥ भूसुरस्थिवशतःकृणपुष्टाधान्यनाम्नि
अन्ननाधनपुष्टा॥१०॥ स्युःसुवर्षणकरापयोधराइक्षुशालिकृषिराववसुंधरा
नैवसंगरपराःक्षितीश्वराईश्वरेणसुखितासदानराः॥११॥ फलसस्ययु
तंमहीतलंसुपयोवर्षिपयोदमंडलं॥ अवनीपतिमानसांतरेनवानीतिव
कुधान्यवत्सरे॥१२॥ ज्वराधिकनरातुराभ्रविदुरापसस्यांवरादराश्रित
धरासुराभिरनुरागदारानराः॥ अवर्षणकृशाश्चिराल्पजधरापमाथीनिप
रस्परविघटकक्षराधीश्वराः॥१३॥ अतिसस्यसमन्विताऽवनीधपंक्तिर्वे

कल्पलता

२

द्रुनीरदायिनी॥ जिनवैरिगणास्तु पार्थिवाः सुखिनो विक्रमनाम्नि मानवाः॥१४॥
सुरुचिराधनधान्यविधेर्धराः जलधरा जलवर्षणतत्पराः॥ द्विजवराः सततं विहि
तोध्वरकरणपरा वृषनाम्नि महीश्वराः॥१५॥ अतिशिल्पकलादिभिः समेताः
सुखिनस्युः सुखिनाल्पजनाः॥ शुचिविग्रहगेषोः कृतां वृषैर्ग्रस्तनिधान्यं बहु चित्रभा
नुवर्षे॥१६॥ अतिदाहवेस्यान्ननिर्झरपनीनां महारोगाधिसंपिण्ड्यसंधेजनानां॥
सुभिक्षं क्वचित्क्वापि सौख्यानुभूतिः सुभानौ कचिद्वृष्टिमिंदुः करोति॥१७॥
पार्थिवा धनरता रुजाजिता मानवा गणितविद्ययान्विताः॥ भूरिधान्य
फलसंभृतिः क्षितिः स्त्रारणे धनरतिश्च वर्षति॥१८॥ धनकणाः सुलभा

६

शुचिनीरदाः कृषकराजिविराजितनीरदाः॥ परमधर्मविधायिनि पार्थिवे
सति जनेषु सुखं बहु पार्थिवे॥१९॥ रणनत्परभूभृतां बलैः सहिता भूरु
गादिसंकुलैः॥ जननाभिनरां रताव्यये धनधान्यादिसुखान्विताव्यये॥२०॥
जननाकणतोषिताल्लनासुरराजं हसति स्वसंपदा॥ इह सर्वजिदाख्य
वत्सरे मरणं यांति नृपा रणाजिरे॥२१॥ लोकपालनपरा अवेरिणः
स्युर्नृपा जलधराः प्रवर्षिणः॥ पुत्रमित्रधनधान्यतोषिणः सर्वधारि
णि सदा शरीरिणः॥२२॥ अतिधान्यफलप्रकरा वसुधा जलजा जल
दृष्टिकरा बहुधा॥ मनुजा अभया अगदाः सुसदा क्षितिपाश्च विरोधि

निषेरस्ताः ॥ २३ ॥ मनुजाः क्षितिपारुचिरोग्रकृतिं प्रविहाय — यो निपशां विकृ
तिं ॥ सुपदच्युतितः परदेशगता विकृतेषु धनवस्त्रधनाधिकृता ॥ २४ ॥ अवनी
पतयो विकारयुक्ताः सततं संगरकर्मणि प्रवर्तिताः ॥ मनुजाः सुरुजस्यु
रत्यहर्षिसदपिस्थातवरना निधान्य पुष्टिः ॥ २५ ॥ धरणी कृषणा सुभ
वेद्र्लं सुजलं वर्षति मेघमंडलं ॥ क्षितिपाः सधनाधनाजने निरता लोकसु
रवानिनंदने ॥ २६ ॥ अनिलोत्थसस्ययुगिल्लासजल्ला नगाभवेद् विक
लासकल्या ॥ क्षितिपाश्च नीवनिरता विजयेल्पकमप धान्यमखिलं वि
जये ॥ २७ ॥ सदानंत धान्यादिकीर्णा धरित्री पयोदा बलिः सस्यवोह ४

षिकर्त्री ॥ विवाहोरुकर्मो दिसत्कर्मा सिद्धिर्जयश्चवापिकारम्भ कूपादिराप्तिः ॥ २८ ॥
गोधूमशालिपृथुलेक्षुयवैरुपेतास र्वसहात्यजलदः किल हत्र हंता ॥ चौरै
र्गदैश्च नितरां परिपीड्यमानः सर्वो जनो भवति मन्मथनाम्नि दीनाः ॥ २९ ॥
देहिनः सुगदितः स्फुरधीरा ॥ इति चौरभयतो धनचाराः ॥ न्दनमत्स्य लज
टाघनमात्काद्दुर्मुखे रिपुजिता क्षितिपालाः ॥ ३० ॥ रेणन्सुद्रम्भ्र पाल्वाण
पशाल्या हता रिवृजा स्वक्रम वा होरुकुल्या ॥ धरामध्यसस्यार्धकीलालर्हर
ष्टिस्तथापि श्रिया हेमलं वेन तुष्टिः ॥ ३१ ॥ रणकर्मरता क्षितिपालगणा
ध्वयमल्पनरा भुवि वस्त्रकृपाः ॥ लजहर्षिरति वजनागदिनस्त दर्पीहवि

लं विनिर्नेसुखिनः ॥३२॥ स्वल्पं जलं यच्छति देवराजः क्षितीश्वराः क्षिप्तविकार
भाजः ॥ अग्र्यधान्यमल्पं परधान्यवृद्धिर्विकारिवर्षे नृपरोगआधिः ॥३३॥
नानासंपत्तो विनाश्य मिपाला सर्वे लोकाः सौख्ययुक्ताः सुशीलाः ॥ देवा
धीशो नीवकीलालदः स्यात्छार्वर्यब्दे मेदिनी पूर्णसस्याः ॥३४॥ धनधान्य
सुना धराभृन्नं प्रभुर्वस्थिर्मघवांबुदो निरं ॥ अश्मीतिभयं गदातिरेकः सु
खहीनः प्लवनाम्नि सर्वलोकः ॥३५॥ जलवर्षणनाम्न धान्यनाशः सततं स्याद
तिवस्तुरम्यकोशः ॥ समुपात्तविहारमंगलाः शुभकृन्नाम्नि जना निराकुलाः ॥
३६॥ मित्रभावमपि यांति भूभृतः सस्यदं पदधिकं निपुष्टिनः ॥ शोभकृतो

रद्दिरोगपीडितः स्याज्जनस्तदपि रोगसंयुतः ॥३७॥ कामं मता भूमिपालाः सम
मायुक्षसक्ताद्नि जाभी निरुग्ना ॥ क्रोधिन्यब्दे मध्यवृष्टिः कणानां वृद्धिः स्या
तां क्रोधलोभौ जनानां ॥३८॥ स्वल्पं तलं जलदमंडलमाददाति प्रायेण धा
न्यमखिलं विलयं प्रयाति ॥ लक्ष्मीश्चिरादधिगतापि चला नृपाणां विश्वा
वसौ भवति रोगभयं नृपाणां ॥३९॥ अन्नधान्यमधिकं जलमल्पं भूभृतो भ
वति युद्धमल्पं ॥ स्याज्जनो गतवशाङ्कवधामा वत्सरो यदि पराभवनामा ॥४०॥
क्षितौ दुर्लभं धान्यपुष्पादि नित्यं क्षितीशा मिथः कुर्वते युद्धकृत्यं ॥ पयोवर्षणं
स्वल्पमत्यं नरोगः प्रजानां यदा वत्सरः स्यात्प्लवंगः ॥४१॥ वसुधा अल्प धान्यप

लमलसमेताभ्रशाभीतिरल्पजलदो बलमेना।। नृपतिव्रजो विहितसंगरक
र्मोयदि वत्सरेभवति कीलकशर्मा।। ४२।। निखिलमध्वरताक्षितिदेवाश्रीयु
ताअरिभवोनरदेवाः।। भूतभूतनलतोबहुधान्यासौम्यनाम्निजनताभयभु
न्या।। ४३।। जलवर्षिकराः पयोधराः पशुवृक्षितिः सुखिनोखिलानराः।। क्षि
तिपानिरतान्मत्सरेसतिसाधारणनाम्निवत्सरे।। ४४।। असदाचरणावि
गतद्रविणाः कृतवैरिगणाः नरपालगणाः।। सलिलंनददातिपयोदपति ६
जनताभयमेतिविरोधिकृतिः।। ४५।। गदचौरहुताशयुताजनताकुपतो
विजिताचहताधिमता।। जलदप्रचुरंनददातिपयः परिधाविनिधान्यप

नापचयः।। ४६।। जलवर्षणकृच्च देवदेवकृपणनाशः कुमतावविरोधभावः।।
कथमप्यभिजीवतिप्रमादीजनसंघोयदिवर्षप्रमादी।। ४७।। जलदाज
लदानतत्पराः क्षितिपालाः क्षितिपालनादराः।। वसुधावसुधान्यसंकुला
जनतानंदभरेणसंकुलाः।। ४८।। राक्षसाब्दउदयोनिदनाजनारोगिणोति
रतकार्यसाधनाः।। राक्षसेविहितधान्यनाशनाभूमिवारिपरिवर्षणाहताः
।। ४९।। क्षितिपालकुलेरणकर्मकरंधनधान्यफलादिकमल्पतरं।। अन
लादिकभीतिरिलाविजलानलनाम्निजनाः सकलाविकलाः।। ५०।। क्षिति
भुजवीर्यजितारिगणाभवभीतिभयेक्षितिरल्पकणा।। दधतेजलदाअति

कल्पलता
७

ऽर्कद्वारामिह पिंगलनाम्नि नमंगलता ॥ ५१ ॥ ईतयोप्यद्रवरोगभीतयः स्युस्तथा
पि धनधान्यसंचयः ॥ लोकलोकपतयो निराधयः कालयुक्तशरदि व्ययाधयः
॥ ५२ ॥ धान्यसुभिक्षमखिलं धनिनां नराणां क्षेमं सदैव फलपुष्पभवो द्रुमाणां
॥ वर्षंति मेघनिकराः प्रचुरांबुधाराः सिद्धार्थिनाम्नि धरणीपतयो विवैराः ॥ ५३
धान्यनाशनमतीव तस्कराः स्वल्पवर्षणकराः पयोधराः ॥ राजचंद्रमखिलं रणो
त्सुखं रुद्रनाम्नि जगतोल्पकं सुखं ॥ ५४ ॥ मेदिनीपतिगणो निदुर्मतिसंततं
निहतशत्रुसंततिः ॥ दुर्मतौ न दधि सर्वदेहिनः पुत्रमित्रधनपोत्रशोभितः
॥ ५५ ॥ भूभृतां बलसुखं न विग्रहः स्यात्क्षितौ सकलधान्यसंग्रहः ॥ पूर्वदेश ७

विलंबोपरेस्थिरा दुंदुभौ सुजलदाः पयोधराः ॥ ५६ ॥ धरणी रहिताक्षणादि
नाधरणीनाथगणो रणोन्मनाः ॥ गदतो जगतो गर्भश्रावणं रुधिरोद्गारिणि
नो बुवर्षणं ॥ ५७ ॥ सस्यं प्रणश्यति भयं बहुतस्कराणां युद्धं परस्परमतीव न
रेश्वराणां ॥ रक्ताक्षिनाम्नि जलं प्रबलो निदाघः स्यादीतिराघविकलो
निखिलो जनोघः ॥ ५८ ॥ आदिमधान्यचयंति नृपपोषः स्यात्क्षितिपा
लगणोधिकरोषः ॥ मध्यममंबुददाति सुरेशः क्रोधनाम्नि धनादिक
नाशः ॥ ५९ ॥ भूभृतः परमयुद्धकारकाश्चौरभीतिजलदाबलाहकाः ॥ इ
क्षुतूलमधुधान्यनाशनं स्यात्क्षयेन दधिजीवलोकिनं ॥ ६० ॥ इतिसंक्रम

कमलना

९

रफलं अथ वत्सरशरीरं कृत्तिकाद्वितयं देहे वत्सरस्य प्रकीर्तितं ।
पूर्वाषाढाद्वयं नाभिः सार्पं हृत्कुसुमं मघा ॥१॥ निपीडिते पापखगेन देहे वा
नाशो बालानलभीन्नदेहे ॥ नाभ्यां भयं क्षुज्ज्वलितं न वृष्टिः फलादि पुष्पेहृदये
च धान्यं ॥२॥ इति वत्सरशरीरफलं ॥ अथ नृपादिविचारः ॥ तत्र गर्गमते ॥
चैत्रशुक्लादिदिवसे यो वारः सोऽब्दपः स्मृतः ॥ शुभं वाप्यशुभं सर्वं तस्मादेव फलं
स्मृतं ॥१॥ उदये प्रतिपच्छेषं मुहूर्तद्वयमस्ति चेत् ॥ तस्मिं दिने तु यो वारः सं तु
संवत्सराधिपः ॥२॥ इदं तु नर्मदोत्तरदेशस्थैरेवांगीक्रियते ॥ केचित्तु चांद्र ९
मानेन चैत्रशुक्लप्रतिपत्प्रथमचरणे संवत्सरमन्तिस्तत्र संवारं वत्सरेशमा

हुः ॥ तथा च कश्यपवचनं ॥ चैत्रशुक्लाद्यदिवसे संक्रान्ते प्रथयात्तवे ॥ अर्कोदये तु यो
वारः सोऽब्दपः परिकीर्तितः ॥१॥ अथ चेद्दिनद्वयेपि सूर्योदये प्रतिपत्स्यात्तदापू
र्व एव वारो राजा ॥ चैत्रे मेषार्काद्यार्द्रा तुलाकर्ककेंद्रेकेषु च ॥ नृपो मंत्री धान्यनेता परसस
स्याधिपाः क्रमात् ॥१॥ अत्रोक्तमंत्र्यादिक्रमो नर्मदोत्तरदेशस्थानां संमतः ॥ तत्रत्या
एवं केचिद्वजगन्मोहनक्रममनुसरंति ॥ उक्तं जगन्मोहने ॥ चैत्रादिमेषार्द्रकुलीर
तुलिमृगादिवाराधिपतिः ॥ क्रमेण ॥ राजा च भूपोऽथ सस्यनाथो रसाधिपो नीरसा
नायकस्यात् ॥३॥ आर्द्रादिनाथो घननायकस्याद्धान्याधिपश्चापदिनाधिवारः ॥
दाक्षिणात्यानां तु ज्योतिःफलोदयोक्त एवानुक्रमोऽभिमतः ॥ तद्यथा ॥ चैत्रादिमेष
कर्कार्द्रातुलाकार्मुकवासरः ॥ नृपमंत्रीधान्यमेघरससस्याधिपाः क्रमात् ॥ १ ॥

फल्गुन॥
॥९॥

एवंस्वदेशाद्यवस्थोदिता ॥ अथ राजफलं ॥ निवपुष्पफलमूलविनाशश्चौरभीति
रिहनादकलेशः ॥ भूमिपालकलहोगदकोपः प्राणिनां दिनकरो यदि भूपः ॥
॥१॥ धेनवो नि पयसोधिकतोषः प्राणिनां जलवशात्कणपोषः ॥ भूभृतो विधि
तसज्जनपूजा जायते हिमकरो यदि राजा ॥ २ ॥ मेदिनी धनकणादिवर्जिता भीतिदनी
रानीतिराहह वैरता ॥ वह्निचौरगदभीः कचिज्जलं मंगले क्षितिपतौ न मंगलं ॥ ३
॥ धान्यशालिसकलं महीतलं संयुतं नृपकुलं नराकुलं ॥ भूरिखादि सुभका
र्यसाधनः स्याज्जनाय दिनपात्मबोधनः ॥ ४ ॥ धेनुवृंदमति दुग्धसमेतं वर्षा
णात्फलकणादि नितांतं ॥ यज्ञकर्मणि सतामनुरागः पार्थिवे सुरगुरौ न च रो हेरंब॥
गः ॥ ५ ॥ वसुमती जलपूर्णजलाशया धनयुता जनता रहिता भया ॥ फलक ॥९॥

१८

णापचयोखिलधेनवः स्वल्पपयसो नृपतिर्यदि भार्गवः ॥ ६ ॥ फलधान्यजलादिकाल्पता
जनता नास्कररोगपीडिता ॥ क्षितिपालगणो रणे रतः क्षितिपालो यदि भानुमत्सुतः
॥ ७ ॥ अथ मंत्रीफलं ॥ पयोधान्यपुष्पादिकानामभावः सदा भूमिपानां मिथो
वैरभावः ॥ जनो रोगचौरादिभीतिं दधानो बुधापापतप्तश्च इंदुर्द्विजः स्यात्सभानः
॥ १ ॥ क्षितिर्देवनीतिः कृतयज्ञमानिः क्षितिपालरतिः फलधान्यभृतिः ॥ पत्रा
वः सुखिनो जलदोल्लसदः सुखिनो यदि केरमणीरमणः ॥ २ ॥ भुवभव
र्षणात्कणनाशनं ज्वलनतस्कररोगपीडनं ॥ रणपराः क्षितिपा बुधवं
दने न निरताः सचिवे क्षितिनंदने ॥ ३ ॥ स्यात्कोशवृद्धिर्धरणी नराणां गा
वः सदुग्धा न गदो न रणो ॥ गोधूमशाल्यादि सुयुता धरत्री पर्णोदका च

१९

कल्पलता ॥
॥१०॥

जोमंत्री ॥ ४ ॥ पाथोधराभ्रशिखिरांतिपाथोधान्यकणार्घवर्जनमुदितधात्री ॥ इंद्रयोभ्र
नोसंपन्नोवधात्रीमंत्रीयदास्यात्स्कुरराजमंत्री ॥ ५ ॥ अनिदुग्धयुतागवांगणः
क्षितिपानांनपरस्परंरणः ॥ पशुवृष्टिरतीवतुभिदः कणपोषः सचिवोयदा
सितः ॥ ६ ॥ नैवधान्यफलमूलसंचयः स्याद्वर्षणवशाज्जगत्क्षयः ॥ वह्निभीः
प्रचुरतस्करोदयः सूर्यजोहिसचिवसदामयः ॥ ७ ॥ अथाग्रधान्येशफलं ॥ रवे
र्डंबुवृष्टिर्गदचौरभीतिः क्षितीश्वराणांरणकर्मशक्तिः ॥ गवांनदुग्धंकणपुष्पना
शश्चेदग्रधान्याधिपतिर्दिनेशः ॥ १ ॥ धान्याधिक्यंगोषुदुग्धंप्रभूतंपुत्रैःपौत्रैः
र्लोकवृंदंसमेतं ॥ मेघव्रातोभूरिवर्षतिपाथस्चंद्रश्चेत्स्यादग्रधान्याधिनाथः ॥ हेरंब ॥
॥ २ ॥ जलकणादिकमल्पसंक्षयंज्वलनतस्करजंप्रचुरंभयं ॥ जगदसृग्गदवृंधि ॥१०॥
कं

20

युनंसदाक्षितिस्कंतोग्रिमधान्यपतिर्यदा ॥ ३ ॥ रुक्खिन्नोभयवर्जितानुराधनधान्यांबु
भिरान्विताधरा ॥ नरातिःकुम्भतोरणादिकेशशिपुत्रेग्रिमधान्यनायके ॥ ४ ॥ धनधा
न्यफलार्द्रसंयुताधरणीस्याज्जननामुदान्विता ॥ यदिवाक्पतिरग्रधान्यपःप्रचुर
वारिदवादिदेवपः ॥ ५ ॥ विविधधान्यफलोपचयोंबुनः सकलतोकगणोगदवर्जि
तः ॥ नृपतयः सहिताबद्धसंपदाग्रिमधान्यपतिर्भृगुजोयदा ॥ ६ ॥ धान्यभावःको
शहानिर्नृपाणांमंदावृष्टिःस्याज्जयस्तस्कराणां ॥ रोगाद्वेषुव्याधिपीडाजनस्यप्राग्धा
न्येशश्चेत्सुतोभास्करस्य ॥ ७ ॥ अथमेघेशफलं ॥ सदाउर्वीनंधान्यपुष्पादिनाशः
करोतिकचिन्नीरवृष्टिंस्करेशः ॥ भवेत्तस्करोपद्रवोभूरवंकीनादेनेशेघनेशेसनिव्या
धिभीतिः ॥ ९ ॥ गवांयादसांसस्यपुष्पादिकानांप्रवृद्धिःस्करंबसर्वोवदज्जनानां ॥

कल्पलता
॥११॥

नदीकूपवापीतडागेषु पाथः प्रभूतं प्रदाचंद्रमा मेघनाथः ॥ २ ॥ अनिलप्रब
लोऽग्निभयं प्रचुरं धनधान्यफलादिकमल्पनरं ॥ गदकोपचशाप्तजगत्त्यबलं
क्षितिपे घनपे सति नैव जलं ॥ ३ ॥ क्वचिदामयोऽनविकल्पनं कुर्कोल्लिपिकाव्य
विद्रूणकवृष्टिरलं ॥ जलवृष्टिः सकलधान्यसंभूतिः शशिनेऽधे । नोऽयदि पयो
दपतिः ॥ ४ ॥ स्मरपतिः कुरुते जलवर्षणं विविधसस्यफलादिकपोषणं ॥ द्वि
गणोमुखकर्मकरक्षितेनो जलधराधिपतौ यदि वाक्पतौ ॥ ५ ॥ द्विजकुलमीन
रंसुदंत्रयानि त्रिदशापतिः प्रबलं जलं ददाति ॥ अगणितकपासंयुताधर हेरंब
त्रीजलदपतिर्यदि पूर्वदेवमंत्री ॥ ६ ॥ चोरत्रनादति भयं प्रचुरोगभावः स्या ॥११॥

कंदपुष्पफलमूलकणादिभावः ॥ न कापि वृष्टिरवनीपतिको शहानिशीतंकक्षिव
क्षुपदा घनराजेऽग्नौ ॥ ७ ॥ अथ रसेशफलं ॥ वापिकादिषु जलं न नितांतं लोक
वृंदमति शीतरुजांतं ॥ इक्षुनलयवतन्वविनाशः स्याद्यदा रसपतिर्नलिनीशः ॥ १ ॥
प्रचुरमेक्षवनलयवादिकं सुखकरं क्षितिदेवकदंबकं ॥ दिशति दुग्धमनीव गवांतनि
यदि रसाधिपतिरजोनिपतिः ॥ २ ॥ गुडतैलघृतादिमनल्पकं मणिमुक्ताकन
कादिनाधिकं ॥ मधुपुष्पफलाढ्यं यस्तदा रसराजो वसुधासुतोऽयदा ॥ ३ ॥
वापीतडागसरितादिषु पूर्णमंभः शुंठीकृपालसुना चित्राहिदुभावः ॥
ज घांत्रिकाम त्रपुष्पमधुकपोर्पश्च द्रात्मजोयदि रसाधिपतिर्न्दनोपः ॥ ४

१२ कुंकुमाद्युपचितिर्विवृद्धदकं स्यान्नयांबरफले सवादिकं ॥ चंद्रचंदनसुवर्णसंभृति
श्वेद्र्वेंद्रसपतिर्बृहस्पतिः ॥५॥ कृष्णवस्तुतिलमानसिजं तु त्रपुकांस्यादधिकं
भवेन्नतु ॥ उशनारसनायको यदा वकुकोशय्यगवादिकं नदा ॥६॥ कूर्णानि
लीलोहजातं समर्घं शेष्यं स्वर्णाद्यं रसाद्यं महर्घं ॥ वर्षत्यल्पं वारिहंदार
केत्राः पीडात्यंतं स्याद्यदा कौरिसेशः ॥७॥ अथ पश्चिमधान्येशफलं ॥
ज्वरेण सहितो जनो न वकुधाम वेधान्यकं कुलं क्षितिभृतां मिथो रणवि
धायिनैवोदकं ॥ कुलित्थचणकादिकोपचितिरीतिभीतिः सदा भवेद्धि १२
वसनायकश्चरमधान्यनाथो यदा ॥१॥ भूभृतोरविलजनागवसः

श्रियः सस्यदुग्धफलमूलसंचयः ॥ वासवः प्रचुरनीरदायकः श्वेद्विधुश्चरमधा
न्यनायकः ॥२॥ धान्याभावो दुर्लभं मूलकंदं नीरं स्वल्पं युध्यहृद्भूपवृंदं ॥
रोगाद्दृभीः प्रजानां समाजपश्चाधान्यं स्वामिनीक्ष्मातनूजे ॥ ३॥ य
वव्रीहिगोधूममुद्गसवानां प्रवृद्धिः सुखं सर्वविद्वज्जनानां ॥ पयोगोम
हिष्यादिकानां ससारं बुधे प्राप्त्यधान्याधिपे भूरिनीरं ॥४॥ भूभृता
मिह कदापि न मन्युश्शश्विवर्षति जलं प्रतमन्युः ॥ भूमिदेवनिचयोभिमते
ज्यः स्याद्यदा चरमधान्यपईज्यः ॥५॥ क्षितिसुरामखकर्मणि तत्परा
बकुलमंबु निनां न कणाधरा ॥ नकुषु पुष्पफलादिसमुद्भवश्चरमधा

कल्पलता

१२ न्यपतिर्यदि भार्गवः ॥ ६ ॥ निर्धनाक्षितिनिघ्नतोरणादरः सस्यमल्पमनिरो
गिणोनराः ॥ नैववर्षति जलं सुरेश्वरः स्याद्यदार्द्रकपापः शनैश्चरः ॥ ७
अथआर्द्राप्रवेशफलानि ॥ रवेरार्द्राप्रवेशेयज्जगन्मोहनजं फलं ॥ न
नु विज्ञायसकलं पृथक्त्वेन ब्रुवेधुना ॥ १ ॥ आदौतिथिफलं ॥ प्रतिप
द्दिवसेभानोर्यदार्द्रायां प्रवेशनं ॥ तथांगेहेगेहे तहिभवेन्मंगलवर्ध
नं ॥ २ ॥ भानोर्यहि द्वितियायां भवेदार्द्राप्रवेशनं ॥ नहिस्यात्सर्वधा
न्यानां वस्त्रादीनां विवर्धनं ॥ ३ ॥ भास्करस्य तृतीयायां यद्यार्द्रायांप्र १२
वेशनं ॥ ईतिभीतिभवेन्नहि तस्करादिविवर्धनं ॥ ४ ॥ गणपतिति

थ्यां स्मरहरधिष्ण्ये ॥ यदि रविवेत्रोगोध्रुवमशुभं स्यात् ॥ ५ ॥ पंचम्यां रौद्र
नक्षत्रं प्रयाति यदि भानुमान् ॥ सर्वेषां प्राणिनां तर्हि फलं स्यादुत्तमोत्तमं
॥ ६ ॥ षष्ठ्यामार्द्राप्रवेश[illegible] जायते पद्मिनीपतेः ॥ नहि द्रविणसंपत्सा
नरत्नानां प्रचुरं सुखं ॥ ७ ॥ भास्करो भास्करतिथौ यद्यार्द्रायां विशय
ति ॥ कुरुते नहि लोकानां सततं क्षेममुत्तमं ॥ ८ ॥ यदिस्यामष्टमीतिथ्या
मार्द्रानक्षत्रगो रविः ॥ सस्यानां दासतानहिस्वल्पवृष्टिर्नसंशयः ॥ ९ ॥ सूर्य
स्याशिवनक्षत्रे प्रवेशेनवमी तिथिः ॥ नहि स्यात्सप्रजाभीतिरेवमाहुर्मनीषि
णः ॥ १० ॥ सूर्यस्यार्द्राद्रप्रवेशे या दस्या दशमीतिथिः ॥ नानाविधानिकार्या

कल्पलता

१४

णिमंगलानिदिनेदिने ॥११॥ एकादश्यांतिथौसूर्योरौद्रभंयातिचेन्नदा ॥
सकलंधनधान्यादिसुभिक्षंजायतेध्रुवं ॥१२॥ द्वादश्यांरुद्रनक्षत्रे प्रवि
ष्टश्चेद्दिवाकरः ॥नानाविधानिकार्याणिजनःप्राप्नोतिनिश्चितं ॥१३॥
दिवाकरस्यरौद्रर्क्षेप्रविशेच्चत्रयोदशी ॥तिथिर्यदिस्थितानंदापनेदनर्गलंजन
॥१४॥ रवेश्शिवर्क्षेविशतेतिथिर्यदिचतुर्दशी ॥समस्तधान्यनाशनंमहर्घताभवे
न्नदा ॥१५॥ पौर्णमास्यांदिनेशस्यआर्द्रानक्षत्रगोयदि ॥प्रजानांनहिवि
विधासंपूर्णास्युर्मनोरथाः ॥१६॥ अमायांपद्मिनीनाथेरौद्रनक्षत्रगेसति ॥
भूमिपानांविनाशस्यात्तस्कराणामुपद्रवः ॥१७॥ अथवारफलं ॥ दिनकरवारेप
शुपतिधिष्ण्ये ॥दिनपतिवेशेसतिपशुनाशः ॥१॥ शशधरवारेस्मरहरवा १४

धिष्ण्ये ॥दिनकरवेशेसुभिक्षहिसुभिक्षं ॥२॥ भानोर्वेशःपृथ्वीसूनोर्वारेरौद्रेधिष्ण्ये
चेत्स्यात् ॥वस्त्राघातोपृथ्वीशानांकल्याणमभिनीतः कृणाः ॥३॥ सुरराजगुरोर्वा
रेद्युमणिर्यदिरौद्रगः ॥सर्वेषांनहिजंतूनांद्रव्यपृथ्व्यासुखंबहु ॥४॥ दैत्यराज
गुरोर्वारेयदिस्याद्रौद्रगोरविः ॥नहिशांतिश्चपुष्टिश्चतुष्टिप्रतिदिनंनृणां
॥५॥ शनैश्चरस्यवारेचेद्रविरार्द्रागतोयदि ॥कुशलानहिलोकानांनिर
रंबुधिमंदता ॥६॥ अथनक्षत्रफलं ॥ रवेरार्द्राप्रवेशेचेद्धस्तभंदिनभंभ
वेत् ॥अश्वादिपशुसंघस्यवृद्धिःस्यान्मंगलानिच ॥१॥ अर्कस्यरौद्रसंवेशेपू
र्णाचेंद्रभंयदि ॥नहिस्याद्रोगबाहुल्यंशुभंनैवकदाचन ॥२॥ कृत्तिका

यदि चंद्रर्क्षमाश्लेषिष्ण्यंगतेरवौ॥ अन्याद्विजायंभूरितर्हिस्यांनंखुवर्षणं॥
३॥रोहिणीचंद्रनक्षत्रंभानुरार्द्राप्रवेशनं॥तर्हिधान्यविनिष्पत्तिःसंतोषो
खिलदेहिनां॥४॥यदिरौद्रप्रविष्टोर्कोमृगांगेमृगकेसरी॥धान्यांबरघ
नादीनिप्रचाल्यंतर्हिजायते॥५॥रौद्रनक्षत्रगेचंद्रेरौद्रभंयदिचेद्रविः॥
सकलप्राणिनस्तर्हिरौद्रकर्मप्रवर्तते॥६॥अर्कस्यरौद्रसंवेशेयदिचंद्रपु
नर्वसुः॥अभिवृद्धिःसमस्तानांसस्यानांतर्हिनिश्चयः॥७॥दिनर्क्षेपुष्यनक्ष
त्रेरौद्रंव्रजतिचेद्रविः॥तदाजलाप्लुताभूमिःसर्वधान्यसमन्विता॥८॥सार्प
भंदिनभंचेत्स्याद्रवेरार्द्राप्रवेशनं॥दारुणंकर्मलोकानांभवेत्सौख्यवि

नाशनं॥९॥रौद्रंविशतिचेद्भानुःपितृभेचंद्रसंयुते॥अल्पवृष्टि
स्तदाद्रिष्याकंदमूलादिकाल्पता॥१०॥भाग्यगेसतिचंद्रर्क्षेजायतेयदिगो
रविः॥तदाभूमिस्तनांर्काणिर्नित्यमहंभाग्यवर्धनं॥११॥यदिरौद्रगआदि
त्यचंद्रमार्यमभेचते॥तदासस्याभिवृद्धिःस्यात्पुत्रपौत्रयुतोजनः॥१२॥
हस्तनक्षत्रगेचंद्रेरौद्रनक्षत्रगोयदि॥सविनास्यात्तदासर्वैसस्यसौ
ख्यसमन्वितः॥१३॥सवितायदिरौद्रर्क्षेव्रजेच्चित्रर्क्षगःशशी॥तदाचि
त्राणिधान्यानिसर्वदेवशुभंभवेत्॥१४॥भास्करेरौद्रगस्वेत्स्यात्स्व
रूतेदिनभंसति॥धनधान्यसमृद्धिःस्याद्धर्मवृद्धिर्दिनेदिने॥१५॥

चित्रास्वायदिचंद्रर्क्षे भानोरार्द्राप्रवेशनं ॥ तदानिखिलरोगाणांवि
नाशोजायतेध्रुवं ॥ १६ ॥ शशांकेसहितेमैत्रे शिवभंयातिचेद्रविः ॥ सर्वे
लोकाश्चभूपाश्चसंतुष्टास्युस्तदाभृशं ॥ १७ ॥ ऐंद्रभंचंद्रसंयुक्तंसवितारु
द्रगोयदि ॥ तदासकललोकानांजायतेप्रचुरंभयं ॥ १८ ॥ चंद्रक्रांते
निर्ऋतिभेच्यखाद्रौरविवेशनं ॥ भयंनानाविधंभूसांकशस्त्रंरोगसमन्वितः
॥ १९ ॥ आर्द्रांचेद्रविणायुक्तातोयभेदिनभेसति ॥ नहिंसर्वमहीपाल
परस्परविरोधिनः ॥ २० ॥ वैश्वभेचंद्रसंयुक्तेरौद्रभंयदिसूर्ययुक् ॥ न
दानराःसत्कर्माणिकुर्वंतिमंगलान्विता ॥ २१ ॥ सवितुःशिवनक्षत्रं १६

प्रवेशसमयेभवेत् ॥ वासवंयदिचंद्रर्क्षेतदाबहुतुलादिकं ॥ २२ ॥ श्रवणेचंद्र
सहितेरविणारौद्रभंयदि ॥ सहितस्यात्तदालोकापुत्रसौख्यसमन्विताः
॥ २३ ॥ शशिनावारुणेयुक्तेरविणाशिवदैवतं ॥ यदिस्यात्सहितंनहिंज
लपूर्णावसुंधरा ॥ २४ ॥ पूर्वाभाद्रपदाधिष्ण्येरजनीपतिसंयुते ॥ यद्यर्को
रौद्रभंयातितदासर्वसुखोदयः ॥ २५ ॥ चांद्रेहिर्बुध्न्यनक्षत्रेरौद्रेचेदर्क
वेशनं ॥ तदासर्वाणिकार्याणिसिद्धिंयांतिनृणांसदा ॥ २६ ॥ शशिप्य
निपौष्णेसतियदिरौद्रभं ॥ प्रविशतिभानुर्नरपतिनिधनं ॥ २७ ॥ ॥
अथयोगफलं ॥ प्रथमयोगेत्रिनक्षधिष्ण्ये ॥ यदिरविवेशोबहुच

कल्पलता

सुसस्यं ॥ ३ ॥ प्रीतियोगे विद्यमाने सत्यर्कोयदि रौद्रगः ॥ सर्वा वसुमती नहि
१७ सलिलेन परिप्लुता ॥ २ ॥ आयुष्मत्संज्ञके योगे यदि भास्वान् शिवर्क्षगः ॥
तर्हि सर्वमहीपालाः स्वस्थचित्ता निरामयः ॥ ३ ॥ सौभाग्यनामके योगे रौ
द्रगश्चेद्दिवाकरः ॥ सौभाग्यारोग्यता वाग्मिन र्हि स्यात्सर्वदेहिनां ॥ ४ ॥
सति शोभनके योगे रौद्रगः पद्मिनीपतिः ॥ शोभनं कर्म कुर्वन्ति तर्हि सर्वे
नृपाजनाः ॥ ५ ॥ अतिगंडाख्ययोगे च आर्द्रायां ति दिवाकरः ॥ परस्प
रं महायुद्धं नहि कुर्वन्ति भूमिपाः ॥ ६ ॥ सुकर्मनामयोगेथ्यंयादीशभं
स्त्रिव्रजेत् ॥ नदा समस्तभूसुरा सुकर्मकर्मयुक्तताः ॥ ७ ॥ स निधृतियो १७

गे यदि दिनेशः ॥ प्रविशति गिरीशं भवति सुभिक्षं ॥ ८ ॥ योगेशूलाभिधाने चेद्रौ
द्र्यां याति दिवाकरः ॥ शूलादिकैर्महारोगैः पीड्यन्ते नतदा नृणां ॥ ९ ॥ गंडयोगव
र्तमाने रौद्रगोयदि भास्करः ॥ नराशुभानि कार्याणि कुर्वन्ति निखिलायनाः ॥ १० ॥
तरणेयदि रौद्रर्क्षं प्रवेशो वृद्धियोगकः ॥ पुत्रपौत्रादिवृद्धिस्स्यात्तर्हि यज्ञादिकर्मे
च ॥ ११ ॥ सति ध्रुवाख्ययोगे चेद्रविणाक्रांति भीशभं ॥ जनाजनेशाः सर्वेपिनैव
चंचलमानसाः ॥ १२ ॥ व्याघातनाम्नि योगे चेद्रौद्रस्योगेदहर्पतिः ॥ नराजनानां
सर्वेषां दुर्भिक्षात्प्राणनाशनं ॥ १३ ॥ रवेरार्द्राप्रवेशश्च समये यदि हर्षणः ॥
नहि धान्यादिसंवृध्या प्राणिनो हर्षसंभवः ॥ १४ ॥ वज्राभिधानयोगे चेत्तपनो रौ

द्रुगोभवेत् ॥ तर्हि नृपालकलहं क्वचित्स्यात्स्वल्पवर्षणं ॥ १५ ॥ मार्तंडसि
द्धियोगे चेत्कुर्याद्गेहप्रवेशनं ॥ धनधान्यं वरादीनां वृद्धिस्यान्न हि नोग
दः ॥ १६ ॥ व्यतीपाताभिधे योगे रविरार्द्रां गतो यदि ॥ तर्हि राज्ञां जनानां
चनिश्चये धनमेक्षयः ॥ १७ ॥ वरीयान्वर्तमानश्चेद्गेहे राष्ट्रप्रवेशनं ॥ अह
स्यादखिलं धान्यं कंदमूलादिदुर्लभं ॥ १८ ॥ परिघे सति योगे चेद्विधुम
णि शिवभं यदि ॥ तदा धर्मार्थयोर्नाशो राज्ञा नृपरिपीडकः ॥ १९ ॥ शिव
योगे शिवर्क्षे चेद्व्रजेद्दिवसनायकः ॥ सदाचाररताः सर्वे सदा मांगल्यव
र्धनः ॥ २० ॥ सिद्धयोगे सहस्रांशुः शिवनक्षत्रयायिनी ॥ आद्रता नाहि १८

कार्याणि सिद्धिः सख्यादिकं बहु ॥ २१ ॥ अंशुमान्रौद्रनक्षत्रं साध्ययोगे प्र
याति चेत् ॥ असाध्यमपि साध्यं स्यात्कार्यं न हि न पुष्पनान् ॥ २२ ॥ शुभयो
गे दिनेशश्चेन्नक्षत्रे धूर्जटेर्व्रजेत् ॥ तर्हि कीलालवृष्टिस्यात्सर्वे संतुष्टमा
नसाः ॥ शुक्लयोगे दिनकरे रुद्रतारोद्गमे सति ॥ जलवर्षणयोगेन धाद्युप न्या
चयो भवेत् ॥ २४ ॥ ब्रह्माभिधाने योगे चेन्नलिनीशः शिवर्क्षगः ॥ जलं च
सकलं धान्यं मध्यमं तर्हि जायते ॥ २५ ॥ ऐंद्राभिधाने योगे चेद्विरोचन
समन्विते ॥ त्रिलोचनस्य नक्षत्रं ददाति जलवर्षणं ॥ २६ ॥ सवितैवैधृति
योगे चेन्नरणिः शिवधिष्ण्यगः ॥ सर्वेषामपि जंतूनां तदा व्याधिभयं भ

वेत्॥२७॥इति योगफलं॥ अथ वेलाफलं॥ पार्वतीरमणभं यदा दिवास्याद्दि
वाकरसमन्वितं तदा॥आयने वसुमती कृषाणानितानस्करादिकभयं जलात्सतं
॥१॥निशायां यदा रौद्रमर्कप्रवेशस्तदानीं वराष्टिं [illegible] विधत्ते सुरेशः॥गवां स्या
त्सुखं सर्वसस्यप्रभूतं महीपालवृंदं रणेनैव सक्तं॥२॥रौद्रप्रवेशे तरणे वि
धुश्चेत्रिकोणस्थोथ चतुष्टयस्थः॥जलर्क्षगो वा शुभवीक्षितो वा धान्यप्रभू
तं निखिलं तदानीं॥३॥इति वेलाफलं॥ अथ नवविध मेघानयनं॥शकाष्ट
युणितं नंदै ९ र्भाजितं शेषतो घनः॥ आवर्तपक शेषे स्यात्संवर्ताख्यो द्विशेष
कं॥१॥त्रिशेषे पुष्करो द्रोण चतुःशेषे प्रकीर्तितः॥कालनामा पंचशेषे नि १९

लकस्तथा॥२॥वरुणः सप्तशेषे स्याद्वायुरष्टावशेषकं॥नवशेषे तमोना
माक्रमान्मेघान वस्मृतः॥३॥विनाशनं शालियवादिकानां तथैव कार्पास
घृतादिकानां॥धेनोयदावर्तकनाम्नि येंस्वल्पं जलं स्यात्क्षिति नाम पायः॥
॥४॥कामाधिक्यं स्वल्पधर्माधिकार्ये पृथ्वीपालास्तत्परा नान्यकार्ये॥सं
वर्ताख्ये नीरदः स्यात्क्षितौ यत्र प्रायो यो वायुर्वाति सर्वत्र यत्र॥५॥नैव कंदफलमू
लविहादिजायते विविध पानकहानिः॥रोगवाजनकराल्पमनल्पं पुष्करे जल
धरे जलमल्पं॥६॥महीशाः सुसंपत्तिरुख्यासे मताः समस्ता मही भूरि धान्येन
युक्ता॥यदा जायते द्रोणनामा पयोदस्तदा देवनाथो भवेत्सत्संयोदः॥७

रोगतोविपुलतावपुषनास्यान्मिथः कलहताक्षसाध्वनां॥ कालनामजल
दोस्ययत्रदंनेववर्षनिजलंत्वषानदा॥८॥ सत्वयोदिशनिरोकुलपूर्णाव
स्यनोखिलमहीपरिपूर्णा॥ नीलनामजलदेजलवृष्टिर्जायतेसकलमानव
तुष्टिः॥९॥ अग्निहोत्रकरणादराद्विजास्युःमदाधिकमुदोखिलाःप्रजाः॥
अर्णवेनसहितंमहीतलंवारुणेजलधरेभवेदलं॥१०॥ नैवांबुवृष्टिःकुरुतेदि
नेशःसमस्तधान्यांबरकादिनाशः॥ धाराधरस्याद्यदिवायुनामातनप्रजास्ताहि
विहीनधामाः॥११॥ रोगाधिक्यंजायतेतनीरशोषःश्चोरोद्वेगोनेवधान्यादिपो
षः॥यस्मिन्वर्षेस्यात्नमानाममेघःतस्मिंदुःखंप्राप्नुयाल्लोकसंघः॥१२॥इति

मेघफलं॥ अथदेशविशेषणमेघायन॥ शाकेद्विगुणितेसेकेचतुर्भक्तेच
शेषकः॥ ऐरावतोमहापद्मःकुंजितोघनः॥१॥ भागीरथीहिवतोरंतरेयःप्र
देशकः॥ तत्रांबुवृष्टिकर्तास्यान्मेघऐरावतादिकः॥२॥ शाकःस्त्रिगुणितःसै
कोवेदहृच्छेषकोघनः॥ मंदनामामंदभेद्रो मृगमंदोमहाश्विनः॥३॥ जाह्न
वीविंध्ययोर्मध्येयस्यास्त्तदेशकः॥ मंदादिकोजलधरेतत्रवर्षेत्कुदैवतः॥४
एकयुक्तेशकेवेदैर्भक्तेशेषांकतोघनः॥ विद्युज्जितोमहाम्भोरव्यःशीघ्रगोमं
दविक्रमः॥५॥ पृथिव्यायत्रदेशस्यात्कोदाविंध्याद्रिमध्यगः॥ विद्युज्जि
ताद्रिकोमेघोवृष्टिकृत्तत्रजायते॥६॥ वह्निभिर्भाजितेशकेघनःशेषो

२३ कसंमतः॥ सिंधुमेतोमहाकायः पर्जन्येरव्यः प्रकीर्तितः॥७॥ गोदांयांम्यादि
मध्यस्तोयस्माद्भूमिप्रदेशकः॥ करोतिवर्षणंतत्र सिंधुमेतादिकोघनः
॥८॥ एकेनसहितःशाकेनेत्रत्र्छेषतोघनः॥ संवर्तनामात्रथमो द्वितीयःपु
ष्कराभिधः॥९॥ कृष्णातोदक्षिणेभागेयावद्भूमेश्वरः सुधीः॥ द्वि
कृत्तत्रकर्तास्यात्संवर्तारव्यःपयोधरः॥१०॥ इतिदेशविशेषणमेघानय
नं॥ अथद्वादशसर्पानयनं॥ शकोद्वाभ्यां २ युतःसूर्ये १२ भक्तः शेषां
कृतःफणी॥ सुबुध्याख्योनंदसारीककोटकारव्यःपृथुश्रवाः॥१॥ वासुकी
तक्षकाख्यःस्यात्कंबलोउत्तरस्तथा॥ हिममालिनरेंद्राख्यास्वप्नदंष्ट्रोद्वष २३

भिधः॥ सुबुद्धिनामासर्पेनोजायतेभुजंगोयदि॥ नृणां सुबुद्धिकर्तास्यान्मध्य
वृष्टिप्रदायकः॥२॥ यस्मिन्वर्षेनागराजोनंदसर्पोभिधानकः॥ तस्मिन्वर्षेम
हावृष्टिंकुरुतेनंदनेजनाः॥४॥ यदाककोटकोनामाजायतेपवनाशनः॥ न
दानांबुरदानद्रोमरणंस्यान्महीपतेः॥५॥ पृथुश्रवाभुजंगेंद्रोजायतेयत्रवत्स
रे॥ तत्रकील्लाक्लमत्स्यस्यास्यहानिर्नसंशयः॥६॥ उदेतियत्रवत्सरेसवा
सुकीभुजंगमः॥ प्रभूतधान्यनाशकःसुरष्टिकृन्नदाभवेत्॥७॥ तक्षकाभि
धनागेंद्रोजायतेयत्रवत्सरे॥ तत्रमध्यमवृष्टिस्याद्दुर्गमहीनृपतेर्मतिः॥८
यदिकंबलाभिधोभुजंगमःप्रजायते॥ तदास्मिमध्यमंजलंसमलधा

२२ न्यवर्षणं ॥ ९ ॥ यस्मिंदेशेषु जगेंद्रो जायतेश्वनुराभिधः ॥ नवर्षतिजलं वन्ही
नदासस्यंविनश्यति ॥ १० ॥ हिममालीचनागेंद्रो जायतेतस्त्यामही ॥ सम
स्तधान्यसंपूर्णाप्रभूतंजलवर्षितः ॥ ११ ॥ नरेंद्रसंज्ञउरगोयत्रवर्षेप्रजाय
ते ॥ नदास्यांनिखिलापृथ्वीप्रभूतजलपूरितः ॥ १२ ॥ यत्रसंवत्सरेनागोव
ज्रदंष्ट्राभिधानकः ॥ नदांबुवर्षणंनेवसर्वसस्यविनाशनं ॥ १३ ॥ यदाप्यपि
धानस्वभुजंगस्यादयोभवेत् ॥ नदासस्यादिकाल्पत्वसुनरामितितोभयं ॥ १४ ॥
इतिद्वादशसर्पफलं ॥ अथआर्द्रादिनक्षत्राणांगर्भलक्षणं ॥ गर्भपातलक्षणंच
॥ मूलादिषुदशेंद्रमिते पुरविभिषु भांबुशंपोदयचेत्स्यान्नहिशिवर्द्धनीरवि २२

युतांगर्भोदशानाभवेत् ॥ गर्भाद्वाक्षरनंदभूमित १९९२ हस्तिस्तुमेषेरवौचंद्राद्ये
दशकेष्वितांबुपतनंतस्याद्गर्भपातोध्रुवं ॥ ३ ॥ अथरोहिणीचक्रं ॥ मेषार्के दि
ननक्षत्रादृक्षोयुग्म २ नंदवृष्य २ ॥ शाकेसप्त ७ गुणेनंदै ९ र्भाजितेसनिशेषकं
द्विकंत्रियुक्तं ३ शालमाः कर्मेवंलब्धनोमुकुः ॥ ६ ॥ अंगेशुकाश्वमुखका ३ रनि
र्दृष्टिश्चरम्यतः ॥ अरष्टिस्यात्स्वचक्रंचपरचक्रंचनाणकं ॥ ७ ॥ ततोरत्नानिव
स्त्राणि १० ष्टतैलंदुकूलकं ॥ ऊर्णावस्त्रादिसकलावल्कलंभूर्जपत्रकं ॥ ८ ॥ सु
वर्णेस्यान्नतः स्तान्ने १९ वंगनदनुरोप्यकं ॥ लोहंस्वर्णवस्त्रतारत्नं २३ पित्तलंचाप
कांस्यकं ॥ २६ ॥ ९ ॥ शाके ९८ गुणितेनंदै ९ र्भाजितेसनिशेषकं ॥ द्विघ्न २ त्रियु

कल्पलता

२२ कं ३ ग्रनास्यात्प्रकृतिर्लब्धं तेष्यनः ॥ १० ॥ सौम्यस्वभावः संप्रोक्तस्यात्स्यापप्रकृ
तिस्तथा ॥ पुण्यस्वभावस्तद्वनुव्याधिर्भैषज्यमय्नः ॥ ११ ॥ आचार ६ स्यादना
चारः ७ मरणं ८ खलु जन्मन ॥ स्याद्दृशोपद्रवो नूनं १० देशस्वास्थ्यं ततः परं ॥ १२
चौरभीश्चोरशमनं १२ अग्निभीरग्निनाशनं ॥ १४ ॥ विषभीति १६ विषशमः १७
सेवकत्वं ततः परं १८ ॥ १३ ॥ स्वामित्वं १९ स्यान्निजधन २० स्ततः परधनं भवेत् ॥ २१
द्यूतं च २२ पुंस्त्वलीकर्म २३ जारणं २४ तारणात्ययः २५ ॥ १४ मरणं २६ मारणशम २७
स्तंभनं २८ स्तंभनात्ययः २९ ॥ मोहनं ३० मोहनशम ३१ स्तत उच्चाटनं ३२ भवेत् ॥
उच्चाटनोपशमनं ३३ स्याद्वशीकरणं ततः ॥ वशीकरणनाशः स्यात् ३५ द्यूतप्रश्न २२

निरयतः ३६ ॥ १६ ॥ स्यात्पितृप्रकृतिः ३७ पश्चात्कफप्रकृतिरीरितं ३८ ॥ द्वं
द्वजः ३९ संनिपातश्च ४० यशश्चापयशो ४२ भवेत् ॥ १७ ॥ गर्वो ४३ यतः प्रपन्नस्य
४४ द्यूतबाधा ततः परं ४५ ॥ भूतबाधोपशमनं ४६ ग्रहदोषश्च ४७ तच्छमः ४८ ॥ १८
पंचभि ९ सप्तभिर्गोभि ९ रीरिते ३१ पृथक्कादिने वैशके सम्मन्के ७ सति ॥ शेषकं द्व
यहतं पंचयुक् ९ कस्युः द्वंद्वजा जार जाश्चिद जोद्भिजकाः ॥ १९ ॥ शालिवाहनगताब्दसं
युता रेवचरांबुकुगुणाः कलेर्गताः ३५७१ ॥ ताः समाः खखखनरवाग्निसिंधुषु ४३२०००
प्रयुताश्च पि समास्तदेष्यकाः ॥ २० ॥ खखखाख्रनर्क [illegible] २३६०००० कलेश्चशे
षजं भजेत् ॥ स्वल्पं हि पुण्यमीरितं नरस्य तु २० पानकं ॥ २१ ॥ हस्याद्विपात

कल्पलता

२४

कोनायेकमास्त्रोक्त्का विशेषकाः॥ तद्योगो नख२०हृच्छेषा सर्वेमिष्यनिरीरिताः
॥२२॥ इति विशेषकानयनं॥ अथायव्ययानयनं॥ षट् ६ रवौ शरभुवो १५ र
जनीप्रोष्टे ८ कुजेन गभुवः १७ शशिपुत्रे॥ गोभुवः १९ शशिदृशो २३ गुरावर
र्वो भास्करस्य तनये च दशा १०ऽद्रा॥१॥ त्रिघ्ने च वर्षयति राशिपवत्सरैक्ये प
चान्विते ५ तिथि १५ हृते सति शेषमायः॥ लब्धे कुनागन २८ हते पर्वने ५ समे
ते तिथ्यु १५ हृते सति च शेषमितो व्ययस्यात्॥२॥ इति यव्ययानयनं॥ वेद
रसेंद्रियभूमि १५६४ तशकके कार्तिकसंज्ञिकमासि सिते नवे॥ आद्यतिथौ
भृगुजे निलाधिष्ण्यकल्पलता परिपूर्णतिमुपेता॥ ॥इति कल्पलता संपू २४॥

र्णम्श्रीरस्तु शुभं भवतु॥ ॥शके १७४४ चित्रभानुनामसंवत्सरे आषाढमासे
कृष्णपक्षे प्रतिपदायां भृगुवासरे उत्तराषाढानक्षत्रे इदं पुस्तकं आचार्योपनामकवा
ककृष्णभट्टस्य पुस्तकं समाप्तं॥ ॥श्री॥ ॥ ॥श्री॥ ॥ ॥श्री॥

छ ॥ छ ॥ कल्पलतासं पूर्णं ॥ छ ॥ छ